## बालादर्शे चतुर्विंशः पाठः २४

### " श्री विनायकः "

**प्रतिदिनम्** = daily, **प्रत्यहम्** **(प्रति अहम्)** = daily,

**अविघ्नम्** = without obstacles, **निर्विघ्नम्** = without obstacles,

**यद्यपि** (यदि अपि) = though, **तथापि** (तथा अपि) = even though

अयं कः ? अयं श्री विनायकः। अस्य पिता कः ? अस्य पिता श्री परमेश्वरः। अस्य माता का ? अस्य माता श्री पार्वती। अस्य भ्राता श्रीसुब्रह्मण्यः॥

पश्य ! विनायकस्य शरीरं नरस्येव (नरस्य इव) आननं गजस्येव (गजस्य इव) च वर्तते। अतोऽयं (अतः अयं) " गजाननः " इति नाम भजते। यद्यप्यस्य आननं गजस्येव (गजस्य इव) वर्तते तथाप्यस्य (तथा अपि अस्य) दन्त एक एव। गजस्य तु द्वौ दन्तौ स्तः। गजस्येवास्य (गज्स्य इव एव) मुखे शुण्डा विद्यते॥

विनायको विघ्नानां रजा। अतो विद्यारम्भ काले बालास्तं (बालाः तं) नमन्ति। तथा नम्यमानः स विघ्नान् अपोहति। गोविन्दः प्रतिदिनं विनायकं पूजयति। तेन स निर्विघ्नं सर्वाणि कार्याणि साधयति। त्वमपि प्रत्यहं विनायकं पूजय। तवापि (तव अपि) सर्वस्मिन् (सर्व अस्मिन्) कर्मण्यविघ्नं (कर्माणि अविघ्नं) भविष्यति। अत एव सर्वेऽपि (सर्वे अपि) ---

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥

--- इति प्रार्थयन्ते॥

क) **प्रश्नाः**

१. विनायकस्य शरीरं आननं च कथं वर्तते ?

विनायकस्य शरीरं नरस्येव आननं वा मुखं गजस्येव (गजस्य एव) वर्तते।

२. अतोऽयं कीदृशं नाम भजते ?

अतोऽयं गजाननः इति नाम भजते।

३. कस्य दन्त एक एव , कस्य द्वौ दन्तौ स्तः ?

विनायकस्य वा गजाननस्य एक दन्तः एव गजस्य द्वौ दन्तौ स्तः।

४. कस्येवास्य मुखे शुण्डा वर्तते ?

गजस्येवास्य (गजस्य इव अस्य विनायकस्य) मुखे शुण्डा वर्तते ।

५. अयं केषां राजा ?

अयं विनायकः विघ्नानां राजा।

६. विध्यारम्भ काले बालाः किं कुर्वन्ति ?

बालाः विद्यारम्भ काले विघ्न-विनायकं नमन्ति।

७. तथा नम्यमानः स किं करोति ?

तथा नम्यमानः स विघ्नान् अपोहति।

८. गोविन्दः प्रतिदिनं किं करोति ?

गोविन्दः प्रतिदिनं विनायकं पूजयति।

९. तेन स किं साधयति ?

तेन स निर्विघ्नं सर्वाणि कार्याणि साधयति।

१०. विनायकस्य पूजेन किं भविष्यति ?

विनायकस्य पूजेन सर्वस्मिन् कर्मण्यविघ्नं भविष्यति।

११. विनायकस्य पूजेन किं भविष्यति ?

विनायकस्य पूजेन सर्वस्मिन् कर्मण्यविघ्नं भविष्यन्ति ।

१२. जनाः प्रत्यहं कथं प्रार्थयन्ते ?

जनाः प्रत्यहं " वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।

अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ " इति प्रार्थयन्ते ।

**ख)** उचितैः पदैः वाक्य्यनि पूरयतु ।

शुकाः पक्वानि फलानि शालिं ______ च भक्षयन्ति ।

शुकाः पक्वानि फलानि शालिं <u>मरिचं</u> च भक्षयन्ति ।

2. गोपालः सहपाठिभिः ______ उद्यानमगच्छत् ।

गोपालः सहपाठिभिः <u>विहाराय</u> उद्यानमगच्छत् ।

3. नरः नारी वा विद्यया ______ न शोभते ।

नरः नारी वा विद्यया <u>विना</u> न शोभते ।

4. आतपः कठोरः , चन्द्रिका ______ शीतला मनोहरा च ।

आतपः कठोरः चन्द्रिका <u>मृदु</u> शीतला मनोहरा च ।

5. राघवः अतीव बुद्धिमान् बालकः ______ अलसः ।

राघवः अतीव बुद्धिमान् बालकः <u>किन्तु</u> अलसः ।

ग) **एषां पदानाम् एकवचनं वदत**

केचित् वानराः फलानि खादन्तः स्थिताः ।

कश्चित् वानरः फलं खादन् स्थितः ।

घ) संख्या शब्दाः 20 to 30 संस्कृते

20. विंशतिः 21. एक विंशतिः 22. द्वाविंशतिः 23. त्रयोविंशतिः

24. चतुर्विंशतिः 25 पञ्चविंशतिः 26. षड्विंशतिः 27. सप्तविंशतिः

28. अष्टाविंशतिः 29. नव विंशतिः वा एकोन त्रिंशत् 30. त्रिंशत् ।

ङ) पदच्छेदं कुरुत (Split) ---

१. कर्मण्यविघ्नम् = (कर्मणि + अविघ्नम्) ।

Actions without obstacles.

२. अतोऽयं = (अतः + अयं)

Herefore this *msc.*

३. तान्यादाय = (तानि + आदाय) ।

Having collected them *n*.

४. सर्वेऽपि = (सर्वे + अपि) ।

Also every *masc. pl.*

**शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary**

**प्रतिदिनं , प्रत्यहं** pratidinaṁ , pratyahaṁ = ***in*** **daily**

अविघ्नं , निर्विघ्नं avighnaṁ , nirvighnaṁ = *in* without obstacle

तथापि tathāpi = still, then also

विघ्नः vighnaḥ = *m* obstacle

यद्यपि yadyapi = *in* though

परमेश्वरः parameśvaraḥ = *m* Supreme Lord,

**शुण्डा śuṇḍā= *f* the trunk**

नमन्ति namanti = *P.* salute *pl.*

अपोहति apohati = *P*. removes

पूजयति pūjayati = *P*. worships

साधयति sādhayati = *P*. accomplishes